Your Personal Exams Guide

# Part—IV / भागः —IV

## Language—I / भाषा—I

## Sanskrit / संस्कृतम्

अभ्यर्थिनः **चतुर्थभागस्य** (Part–IV) प्रश्नानाम् (प्र० सं० **91–120**) उत्तराणि दद्युः, यदि तैः **संस्कृतं प्रथमभाषा** (Language—I)-रूपेण चितम्।

**सूचना** : अधोलिखितानां प्रश्नानां (प्र० सं० **91–105**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

**91.** यदा छात्राः विरामादिचिह्नविषयककौशलवर्धनार्थं शिक्षिताः भवन्ति, तदा ते——

(1) स्वस्य अधिगमकौशलं सुदृढं करिष्यन्ति

(2) लेखनशुद्धतां प्राप्स्यन्ति

(3) सम्भाषणकौशलं वर्धयिष्यन्ति

(4) स्वस्य सृजनात्मकतां वर्धापयिष्यन्ति

**92.** भाषाशिक्षणकक्ष्यायां रचनावादस्य (Constructivism) अर्थः भवति——

(1) छात्राः विविध-असमानदृष्टान्तान् (Dissimilar samples) पठित्वा सुदृढं समाधानं स्वयं प्राप्नुवन्ति

(2) छात्राः केनचित् अध्यापकेन सहकृताः भवन्ति, विभिन्नमाध्यमानां (Medium) साह्येन स्वकीयं सिद्धान्तं व्यवस्थापयन्ति

(3) छात्राः प्रपञ्चविषये स्वकीयम् अध्ययनं, ज्ञानञ्च वस्तूनां प्रतिबिम्बन अनुभवद्वारा, भाषाकौशलेन च प्राप्नुवन्ति

(4) छात्राः स्वकीयाम् अधिगमसामग्रीं (Learning aids) स्वयं निर्माय प्रत्यक्षज्ञानं प्राप्नुवन्ति

**93.** निम्नलिखितेषु कतमम् उत्तरं प्रादेशिकभाषाविकासाय समस्या नास्ति इति सूचयति?

(1) अस्मिन् विषये जनानां परिचयाभावः

(2) सुविधानाम् अभावः

(3) बोधने अस्पष्टता

(4) अनुवादविषयक-समस्याः

**94.** भाषार्जनसामर्थ्यं (Language acquisition) नाम——

(1) केवलम् आवश्यकशब्दावल्याः प्रयोगः

(2) तादृशस्य वातावरणस्य निर्माणं यस्मिन् बालकाः मातृभाषाऽध्ययनं कुर्युः

(3) व्याकरणस्य विश्लेषण, बोधार्थं व्यवस्थिता एका पद्धतिः

(4) मानवगतसहजप्रतिभायाः कारणेन भाषा-अध्ययनार्थम् एका प्रक्रिया

www.prepp.in

**95.** भाषाध्यापकः अस्मात् लेखनकौशलं शिक्षयितुं न शक्नोति——

(1) श्रुतलेखनम् (Dictation)

(2) छात्राणां कृते स्पष्टतया लिखितुम् आदेशः

(3) ज्ञानवर्धकविचाराणां (Brainstorming ideas) साह्येन स्वशब्दैः मातृभाषायां लिखितुम् उक्त्वा

(4) छात्रान् लेखादीन् पठितुं सूचयित्वा

**96.** कक्ष्यायां पाठ्यमानसन्दर्भे छात्रः क्लिष्टान् प्रश्नान् पृच्छति। तदानीं किं क्रियते?

(1) तत्क्षणमेव गत्वा सज्जतां कृत्वा शङ्का-समाधानं क्रियते।

(2) तादृशान् सर्वानपि प्रश्नान् विलिख्य अनन्तरदिने सर्वेषां तेषां समाधानं क्रियते।

(3) पुस्तके पठित्वा पश्चात् शङ्का-समाधानं चर्चयितुं प्रयत्नः क्रियते।

(4) छात्रान् तर्जयित्वा अनुशासिताः भवितुं सूचना क्रियते।

**97.** रटनाभ्यासकारणेन (Cramming) विद्यार्थिनां विकासे कीदृशक्षतिः (Loss) भवति?

(1) तेषां बुद्धेः विकासः न भवति।

(2) तेषाम् आत्मविश्वासः नष्टः भवति।

(3) कक्ष्या अध्यापनक्रमात् ते दूरीकृताः भवन्ति।

(4) ते अध्ययनोपरि समुचितं ध्यानं दातुम् अशक्ताः भवन्ति।

**98.** भाषाशिक्षणसन्दर्भे आगमनात्मकपद्धतेः (Inductive method) एषः लाभः अस्ति——

(1) विद्यार्थिभिः गृहकार्य (Homework) करणस्य आवश्यकता नास्ति

(2) विद्यार्थिनः रटनाभ्यासं न कुर्वन्ति

(3) कक्ष्यायाम् अनुशासनं रक्षितं भवति

(4) विद्यार्थी अल्पे एव समये अधिकं पठितुं शक्नोति

**99.** भाषा तावत् अभिव्यक्तेः, स्वमतव्यक्तीकरणस्य सर्वश्रेष्ठं _____ माध्यमम् अस्ति।

(1) प्रचार (Propagation)

(2) संग्रह (Collection)

(3) विनिमय (Exchange)

(4) उपर्युक्तं सर्वमपि

www.prepp.in
Your Personal Exams Guide

**100.** भारतीयच्छात्रस्य कस्याः शिक्षणाय महती आवश्यकता अस्ति?

(1) मातृभाषायाः

(2) मातृभाषा तथा प्रादेशिकभाषयोः

(3) मातृभाषा तथा आङ्ग्लयोः

(4) काः अपि तिस्रः भाषाः

**101.** अभिव्याप्यकक्ष्यायां (Inclusive classroom) भाषाशिक्षणे इयम् एका समस्या——

(1) उपयुक्त-भाषाधिगमवातावरणविकासानुकूलतायाः असामर्थ्यम्

(2) उपयुक्ताधिगम (Learning)-सामग्रेः अभावः

(3) विद्यार्थिनां योग्यताविषयक-अक्षमता

(4) विद्यार्थिषु परस्परं रुचि (Interest) भेदः

**102.** अधस्तनेषु कतमम् उत्तरं मातृभाषाशिक्षणोपयोगि ज्ञानलक्ष्येषु अन्यतमं नास्ति?

(1) भाषातत्त्वानां प्रभूतज्ञानप्राप्तिः

(2) विषयवस्तुनः ज्ञानार्जनम्

(3) उच्चारणस्य ज्ञानार्जनम्

(4) भाषागतविभिन्नप्रकारकाणां लेखानां ज्ञानार्जनम्

**103.** निम्नलिखितेषु का वा पद्धतिः 'शिक्षणपद्धतिः (Teaching method)' उच्यते?

(1) चयनपद्धतिः (Selection method)

(2) रुचिपद्धतिः (Interest method)

(3) प्रेरणापद्धतिः (Motivation method)

(4) उपर्युक्तं सर्वमपि

**104.** भाषाशिक्षणे दृश्य-श्रव्यसामग्री (Audio-visual aids) _____ उपयुक्ता भवति।

(1) शुद्ध-उच्चारणार्थम्

(2) शुद्ध-लेखनार्थम्

(3) शुद्धपठनार्थम्

(4) न कथञ्चित्

**105.** उपचारात्मक-शिक्षणपद्धतिः (Remedial coaching) इति——

(1) समस्या अभिज्ञानार्थम् अपेक्षित-काठिन्यस्य स्तरं वर्धयति

(2) समस्यानां समाधाने साफल्यं प्रति प्रापयति

(3) व्यतिक्रमेण समस्यानां प्रस्तुतिं करोति

(4) समस्याः प्रति भाषासिद्धान्तज्ञानं प्रददाति

www.prepp.in
Your Personal Exams Guide

**सूचना** : अधोलिखितान् श्लोकान् पठित्वा प्रश्नानां (प्र० सं० **115–120**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः॥ 1 ॥

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।
सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ 2 ॥

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम्।
सद्भिर्विवादं मैत्रीं च नासद्भिः किञ्चिदाचरेत्॥ 3 ॥

मित्रेण कलहं कृत्वा न कदापि सुखी जनः।
इति ज्ञात्वा प्रयासेन तदेव परिवर्जयेत्॥ 4 ॥

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् प्रियं हि वक्तव्यं वचने का दरिद्रता॥ 5 ॥

श्रेष्ठं जनं गुरुं चापि मातरं पितरं तथा।
मनसा कर्मणा वाचा सेवेत सततं सदा॥ 6 ॥

**115.** सर्वं कस्मिन् प्रतिष्ठितम्?

(1) पृथिव्याम्

(2) वायौ

(3) सत्ये

(4) रवौ

**116.** कैः न किञ्चिदाचरेत्?

(1) सद्भिः

(2) असद्भिः

(3) मित्रैः

(4) बन्धुभिः

**117.** केन कार्याणि सिद्ध्यन्ति?

(1) मनोरथेन

(2) सुप्तेन

(3) उद्यमेन

(4) मुखेन

**118.** मित्रेण किं कृत्वा जनः कदापि सुखी न भवति?

(1) कलहम्

(2) प्रयासम्

(3) मैत्रीम्

(4) परिवर्जनम्

**119.** प्रियवाक्यप्रदानेन के तुष्यन्ति?

(1) मानवाः

(2) जन्तवः

(3) देवाः

(4) न कोऽपि

**120.** श्रेष्ठपदस्य पर्यायः अस्ति—

(1) गुरुः

(2) माता

(3) पिता

(4) उत्तमः

Your Personal Exams Guid

# Part—V / भागः —V

# Language—II / भाषा—II

# Sanskrit / संस्कृतम्

अभ्यर्थिनः **पञ्चमभागस्य** (Part–V) प्रश्नानाम् (प्र० सं० **121–150**) उत्तराणि दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा** (Language—II)-रूपेण चितम्।

**सूचना** : अधोलिखितानां प्रश्नानां (प्र० सं० **121–135**) विकल्पात्मकोत्तरेभ्यः उचिततमम् उत्तरं चित्वा लिखत।

**121.** प्राथमिक-विद्यालयस्य कस्यचन विद्यार्थिनः श्रवण-वाचनकौशलयोः विकासनार्थं निम्नलिखितपद्धतिषु का वा पद्धतिः उपयुक्ता भवति?

(1) कथा श्रावणं तथा श्रुतलेखनम् (Dictation)

(2) काव्यपाठः तथा भाषाप्रयोगशाला (Language laboratory)

(3) अभिनयः तथा वार्तावाचनम् (News reading)

(4) अभिनयः तथा संवादः (Interaction)

**122.** भाषायाः उपचारात्मकशिक्षणस्य (Remedial teaching) उद्देश्यः कः?

(1) विद्यार्थिनां प्रारम्भिकत्रुटीनां निवारणम्

(2) ज्ञानसम्बन्धित्रुटीनां परिष्करणम्

(3) विद्यार्थिषु आत्मविश्वासभावनायाः विकासः

(4) उपर्युक्तं सर्वमपि

**123.** भाषायाः सामान्य-अवगमस्य ज्ञानार्थं मूल्याङ्कने सर्वाधिक-उपयुक्तः प्रश्नः कीदृशः भवति?

(1) अतिलघु-उत्तरात्मकः

(2) दीर्घ-उत्तरात्मकः

(3) निबन्धात्मकः

(4) विकल्पात्मकः (Objective type)

**124.** "बालाः भाषाध्ययनार्थम् अपेक्षितक्षमतां पुरस्कृत्य उत्पन्नाः भवन्ति"—कः अवदत्?

(1) जीन् पीगेट् (Jean Piaget)

(2) चाम्स्की (Chomsky)

(3) व्योगोटस्की (Vyogotsky)

(4) पावलोव् (Pavlov)

**125.** कदाचित् काचित् बालिका हिन्दीभाषाप्रयुक्त-राज्यात् भवतः प्रान्तम् आगच्छति, तथा भवतः सम्बन्धि भाषाप्रयोगे प्रमादान् करोति। तदा एकः अध्यापकः भूत्वा अधस्तनेषु कथनेषु किं युक्तमिति भवान्/भवती चिन्तयति?

(1) तस्याः भाषाप्रयोगप्रमादानां विषये वारं वारं स्मारणीयम्।

(2) तस्यै समीचीनभाषाप्रयोगार्थम् इतोपि अवकाशाः देयाः।

(3) प्रतिदिनं अर्धघण्टां यावत् नूतनभाषाभ्यासः करणीयः।

(4) तस्याः मातृभाषाप्रभावः अधीयमाननूतनभाषायाः उपरि न स्यात्।

**126.** निम्नलिखितस्य कस्य उद्देशस्य अनुसारं भाषाशिक्षणस्य आवश्यकता न भवति?

(1) जीवनस्य विविधदशानां ज्ञानार्थम्

(2) भाषाबोधस्य (Language comprehension) अध्ययनार्थम्

(3) आभ्यन्तरस्वरस्य (Inner voice) वाचनार्थं, श्रवणार्थञ्च

(4) जीवनस्य विविधावश्यकतानां परिपूरणार्थम्

www.prepp.in

**127.** भाषासन्दर्भे निबन्धात्मकप्रश्नार्थं निम्नलिखितेषु उचितं किम्?

(1) विद्यार्थिनः सामर्थ्यानुसारं मूल्याङ्कने सहायकं भवति येन स्वस्य विचारान् लिखितभाषायां व्यवस्थितरूपेण व्यक्तीकरोति

(2) एतत् विद्यार्थिनां परीक्षासु केषाञ्चन प्रश्नानाम् उत्तरकरणार्थं सहायकं भवति

(3) विद्यार्थिभिः केषाञ्चन प्रश्नानां कृते एव उत्तरं सज्जीकरणीयम्। एवं प्रकारेण तैः बहुपठनसमयः रक्षितः भवति

(4) एतत् सम्पूर्णपाठ्यक्रमम् आवेशयति

**128.** दिव्याङ्गानां (Children with special needs) लेखनकौशलवर्धनार्थं कस्य आवश्यकता भवति?

(1) विचाराणां मौलिकता

(2) प्रतीकात्मक-भाषायाः (Symbolic language) प्रयोगः

(3) समीचीनशब्दावल्याः प्रयोगः

(4) सुन्दराणि हस्ताक्षराणि

**129.** भाषायां निरन्तर, समग्रमूल्याङ्कनार्थं कस्योपरि बलं देयम्?

(1) उत्तम-शब्दावली (Correct vocabulary)

(2) परियोजनाकार्यम् (Project work)

(3) शुद्धोच्चारणम् (Correct pronunciation)

(4) विभिन्नसन्दर्भेषु भाषाप्रयोगसामर्थ्यम्

**130.** बहुभाषिकता (Multilingualism)—

(1) भाषाशिक्षणे एका बाधा

(2) भाषासंसाधनानां कृते प्रमादकारी

(3) भाषाधिगमे एकं महत्त्वपूर्णं संसाधनम्

(4) भाषाधिगमे समस्यासृष्टिं करोति

**131.** भाषायाः प्राथमिकरूपम् अस्ति—

(1) सङ्केतभाषा (Sign language)

(2) व्याकरणम्

(3) लिखितभाषा

(4) मौखिकभाषा

**132.** प्राथमिकस्तरे, कथा तथा कवित्वम्, अनयोर्मध्ये अधस्तनेषु कः पक्षः साधुः इति भवान्/भवती चिन्तयति?

(1) ते मूल्यपरकाः (Value-oriented) भवेयुः

(2) कथाः तथा कवित्वम् उभयमपि शब्दावली (Vocabulary) दृष्ट्या समृद्धौ भवेताम्

(3) विभिन्नमुख्यनामधेयानाम् उदाहरणानां पुनरावृत्तिः बहुवारं भवितव्यम्

(4) विशिष्टलेखकानां कवित्वं तथा कथाश्च

www.prepp.in

**137.** निखिले संसारे कलहस्य अशान्तेः वा वातावरणस्य कारणम्

(1) सहायता-अभावः

(2) विश्वासाभावः

(3) विकासाभावः

(4) व्यवहाराभावः

**138.** बहुविषयेषु यः सहायतां करोति, सः भवति——

(1) मित्रम्

(2) शत्रुः

(3) बन्धुः

(4) सेवकः

**139.** ज्ञानविज्ञानयोः क्षेत्रे समृद्धिं प्राप्तुं का भावना अपेक्षिता भवति?

(1) स्पर्धाभावना

(2) प्रभुत्वभावना

(3) विश्वबन्धुत्वभावना

(4) मैत्रीभावना

**140.** 'एतादृशः' इति पदं कस्मिन् गणे अन्तर्भवति?

(1) नामवाचके

(2) सर्वनाम्नि

(3) क्रियाविशेषणे

(4) क्रियायाम्

Your Personal Exams Guide

